योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०४१

एकचत्वारिंशः सर्गः ४१

श्रीवसिष्ठ उवाच ।

अस्वभावस्वभावोऽयं सर्वोऽहंतादिवेदनः ।

स्वभावैकस्वभावेन निर्वाणीक्रियतां स्वयम् ।। १

यत्रादित्यो भवेत्तत्र यथालोकस्तथा भवेत् ।

परं विषयवैरस्यं तत्र यत्र प्रबुद्धधीः ।। २

अकर्तृकर्मकरणमदृश्यद्रष्टृदर्शनम् ।

जगदग्राह्यसंभारमभित्तौ चित्रमुत्थितम् ।। ३

न चोत्थितं किंच न वा शान्ते शान्तं यथास्थितम् ।

अनामयं परं ब्रह्म सत्यमव्ययमेव तत् ।। ४

चिच्चमत्कारमात्रात्मकल्पनारङ्गरञ्जनाः ।

संख्यातुं केन शक्यन्ते खे जगच्चित्रपुत्रिकाः ।। ५

रसभावविकाराढ्यं नृत्यन्त्यभिनयैर्नवैः ।

परमाणुप्रति प्रायः खे स्फुरन्त्यम्बरात्मिकाः ।। ६

सर्वर्तुशेखरधरा दिग्बाहुलतिकाकुलाः ।

पातालपादलतिका ब्रह्मलोकशिरोधराः ।। ७

चन्द्रार्कलोलनयनास्तारोत्करतनूरुहाः ।

सप्तलोकाङ्गलतिकाः परितोच्छाम्बराम्बराः ।। ८ ।

द्वीपाम्बुराशिवलया लोकालोकाद्रिमेखलाः ।

भूतभारचलज्जीवप्रवहत्प्राणमारुताः ।। ९

वनोपवनविन्यासहारकेयूरभूषिताः ।

पुराणवेदवचनाः क्रियाफलविनोदनाः ।। १०

त्रिजगत्पुत्रिकानृत्यं यदिदं दृश्यते पुरः ।
ब्रह्मवारिद्रवत्वं तत्तद्ब्रह्मानिलवेपनम् ।। ११
अस्वभावस्थितैवास्य कारणं कारणात्मकम् ।
असुषुप्तं स्थिता स्वापे स्वप्नस्येव सतीव सा ।। १२
असुषुप्तसुषुप्तस्थः स्वभावं भावयन्भव ।
जाग्रत्यपि गतव्यग्रो मा स्वप्नमिदमाश्रय ।। १३
यज्जाग्रति सुषुप्तत्वं बोधादरसवासनम् ।
तं स्वभावं विदुस्तज्ज्ञा मुक्तिस्तत्परिणामिता ।। १४
अकर्तृकर्मकरणमदृश्यद्रष्टृदर्शनम् ।
अरूपालोकमननं स्थितं ब्रह्म जगत्तया ।। १५
कान्ते कान्तं प्रकचति पूर्णे पूर्णं व्यवस्थितम् ।
द्वित्वैक्यरहिते भाति द्वित्वैक्यपरिवर्जितम् ।। १६
सत्यं सत्ये स्थितं शान्तं सर्गात्मन्यात्मनि स्वयम् ।
आकाशकोशसदृशं शिलाजठरसंनिभम् ।। १७
सुरत्नजठराकारं घनमप्यम्बरोपमम् ।
प्रतिबिम्बमिव क्षुब्धमप्यक्षुब्धमसच्च सत् ।। १८
भविष्यन्नवनिर्माणं चेतसीव स्थितं पुरम् ।
ब्रह्म बृंहितभारूपमभेदीकृतमानसम् ।। १९
यथा संकल्पनगरं संकल्पान्नैव भिद्यते ।
तथायं जगदाभासः परमार्थान्न भिद्यते ।। २०
हेमपीठमिवानेकभविष्यत्संनिवेशवत् ।
लक्ष्यमाणमपि स्फारं शान्तमव्ययमास्थितम् ।। २१
अजस्रनाशोत्पादाढ्यमेकरूपमनामयम् ।
अनाशोत्पादमजरमनेकमिव कान्तिमत् ।। २२
ब्रह्मैव शान्तिघनभावगतं विभाति
सर्गोदयेन विगतास्तमयोदयेन ।

व्योमेव शून्यविभवेन गलत्स्वभाव-

लाभं प्रति प्रसभमेव ननु प्रबुद्धे ।। २३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो ० निर्वाणप्रकरणे उ० स्वरूपविश्रान्त्यर्थमुपदेशकरणं

नामैकचत्वारिंशः सर्गः ।। ४१ ।।